॥ श्रीरमास्तोत्रम् ॥

जय कोल्हापुरनिलये भजदिष्टेतरविलये ।
तव पादौ हृदि कलये रत्नरचितवलये ॥ १॥

जय जय सागरजाते कुरु करुणां मयि भीते ।
जगदम्बाभिधया ते जीवति तव पोते ॥ २॥

जय जय सागरसदना जयकान्त्या जितमदना ।
जय दुष्टान्तककदन कुन्दमुकुलरदना ॥ ३॥

सुररमणीनुतचरने सुमनः सङ्कटहरणे ।
सुस्वररञ्जितवीणे सुन्दरनिजकिरणे ॥ ४॥

भजदिन्दीवरसोमा भवमुख्यामरकामा ।
भयमूलाळिविरामा भञ्जितमुनिभीमा ॥ ५॥

कुङ्कुमरञ्जितफाले कुञ्जरबान्धवलोले ।
कलधौतामलचेले कृन्तकुजनजाले ॥ ६॥

धृतकरुणारसपूरे धनदानोत्सवधीरे ।
ध्वनिलवनिन्दितकीरे धीरदनुजदारे ॥ ७॥

सुरहृत्यञ्जरकीरा सुमगेहार्पितहारा ।
सुन्दरकुञ्जविहारा सुरवरपरिवारा ॥ ८॥

वरकबरीधृतकुसुमे वरकनकाधिकसुषमे ।
वननिलयादयभीमे वदनविजितसोमे ॥ ९॥

मदकलभालसगमने मधुमथनालसनयने ।
मृदुलोलालकरचने मधुरसरसगाने ॥ १०॥

व्याघ्रपुरीवरनिलये व्यासपदार्पितहृदये ।
कुरु करुणां मयि सदये विविधनिगमगेये ॥ ११॥

इति श्री हुलगी श्रियःपत्याचार्य विरचितं रमास्तोत्रम् ।

॥ भारतीरमणमुख्यप्राणान्तर्गत श्री कृष्णार्पणमस्तु॥